श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

तञ्जै श्री ताताचारियर् विरचिता

# ॥ श्रीकोदण्डराम सुप्रभात श्लोकाः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीकोदण्डराम सुप्रभात श्लोकाः ॥

कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम्॥ १ ॥

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठगरुडध्वज।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गळं कुरु॥ २ ॥

कण्वादिमुनिसन्दृष्ट मन्वादिनृपवंशज।
अण्वादि भूत संपूर्ण तन्वादि सुखदायक॥ ३ ॥

कासार तीर वडुवूर् पुर सौम्यमूर्ते
सीतालतावलित पुष्पित पारिजात।
केदार मध्य विलसत् बकुळाटवीश
प्राभातिकं वितनुतां तव दर्शनं नः ॥ ४ ॥

प्राची दिशाङ्गणमिहैति रविप्रकाशः
गाढान्धकार पटलोपिविलीयतेऽद्य।
आवाति मन्दमनिलः कमलालयोत्थः
कोदण्डराम भगवन् तव सुप्रभातम्॥ ५ ॥

ब्रह्मादि देव निवहः त्वदुपासनाय
भक्ति प्रभाव परिपक्त्रिम भावबन्धः।
युक्तः सनन्दन मुखैः त्वरयोपयातः
कोदण्डराम भगवन् तव सुप्रभातम्॥ ६ ॥

सप्तर्षयो मुनिवराः कुसुमोपहाराः
दिव्यापगाविमल नीर कृतावगाहाः।
त्वत्सन्निधौ सममिलन्त्यधुनावियत्तः
कोदण्डराम भगवन् तव सुप्रभातम्॥ ७ ॥

त्वन्मन्दहासचिबुकाधर दर्शनाय
कासारयोगि परकालमुखादि भक्ताः।
सत्वोत्तराः प्रविलसन्ति तवालयान्तः
कोदण्डराम भगवन् तव सुप्रभातम्॥ ८॥

योगीशनाथ मुनियामुन शैल पूर्ण
श्रीभाष्यकार निगमान्त गुरूत्तमास्त्वाम्।
गोष्ठीनिविष्टमणयः प्रतिपालयन्ति
कोदण्डराम भगवन् तव सुप्रभातम्॥ ९॥

शत्रुञ्जयो गजपतिर्भवतः प्रसिद्धः
लक्ष्मीनिवास सुभगा सुरभिः सुवत्सा।
दिव्यो हयश्चतव सन्निधिमाश्रयन्ते
कोदण्डराम भगवन् तव सुप्रभातम्॥ १०॥

वैताळिका विविध वाद्यविशेषनादैः
कर्णाभिराम रचने स्तुतिमारभन्ते।
तिष्ठन्ति देववनिताश्च करात्तदीपाः
कोदण्डराम भगवन् तव सुप्रभातम्॥ ११॥

आभीरताम दधि मन्थन दिव्य घोषः
त्वत्पुण्य नाम सहितो वियदावृणोति।
प्रासादपञ्जरशुकाः कलमालपन्ति
कोदण्डराम भगवन् तव सुप्रभातम्॥ १२॥

गङ्गादिसप्त सरिदाहृत तीर्थकुम्भान्
एलालवङ्गतुळसी घनसार गन्धान्।
आदाय भूसुरवराः प्रतिपालयन्ति
कोदण्डराम भगवन् तव सुप्रभातम्॥ १३॥

शङ्खध्वनिं श्रवण मङ्गळतूर्य घोषं
वीणानिनाद सहितं शृणुतां शरण्य।

दीपोज्वलत्कनकपात्रकराश्च कन्याः
तिष्ठन्ति राघवविभो तव सुप्रभातम्॥ १४॥

दिव्योत्सवेषु तव नूतनसन्निवेशं
दिव्यं विलोक्य भवदेकपरायणानाम्।
संसार एषनितरां अपवर्ग एव
कोदण्डराम भगवन् तव सुप्रभातम्॥ १५॥

वेदान्तयुग्म परिनिष्ठितमानसानां
वेदान्तिनां नियतवास इहेति कृत्वा।
एतत् स्थलं समभवत् हृदयङ्गमं किं
कोदण्डराम भगवन् तव सुप्रभातम्॥ १६॥

श्रीकुम्भकोण नगराधिपशार्ङ्गराज
सान्निध्य कल्पित शठारिकृताभिमान।
श्रीपाञ्चरात्रविहितक्रम नित्यकल्प
कोदण्डराम भगवन् तव सुप्रभातम्॥ १७॥

आहोबिलोत्तम मठाधिपसूरिवर्यैः
श्रीरङ्गनाथ मणिपादु यतीश्वराश्च।
मैसूरवर्ति परकाल मठाधिपाश्च
संप्रापुरद्य भगवन् तव सुप्रभातम्॥ १८॥

यज्ज्यारवः सुमनसां मृदुवादगीतं
दृप्तात्मनां प्रबलभीकर मेघघोषः।
तत्तादृगेष तव हस्तगतो हिचापः
सद्यश्शरण्य जनताघ मपाकरोतु॥ १९॥

कोदण्डमण्डितकरं प्रियया समेतं
वीथीविहाररसिकं शिबिकाधिरूढम्।
स्वेदोद्भव प्रविलसन्मुखमम्बुजाक्षं
त्वां वीक्ष्य सात्विकवराः कृतिनो भवन्ति॥ २०॥

हे राम हे रघुपते करुणैकसिन्धो
    हे जानकीरमण हे विबुधैकनाथ।
हे वातसूनुपरमप्रिय हे मुकुन्द
    कोदण्डराम भगवन् तव सुप्रभातम्॥ २१॥

प्रत्यूष कालनियतं तव सुप्रभातं
    स्तोत्रं मया विरचितं त्वदनुग्रहेण।
ब्रह्मास्त्र सारयुत जीर्णतृणानुवृत्या
    सर्वं क्षमस्व भगवन् तव सुप्रभातम्॥ २२॥

॥ इति श्रीकोदण्डराम सुप्रभात श्लोकाः समाप्ता॥